# tulasIgItA

# તુલસીગીતા

## Document Information

Text title : tulasIgItA

File name : tulasIgItA.itx

Category : gItA, giitaa, tulasI

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# તુલસીગીતા

શ્રીભગવાનુવાચ –
પ્રાગ્દત્વાર્ઘં તતોઽભ્યર્ચ્ય ગન્ધપુષ્પાક્ષતાદિના ।
સ્તુત્વા ભગવતીં તાં ચ પ્રણમેદ્દણ્ડવદ્ભુવિ ॥ ૧॥

શ્રિયં શ્રિયે શ્રિયાવાસે નિત્યં શ્રીધવસત્ રતે ।
ભક્ત્યા દત્તં મયા દેવિ અર્ઘં ગૃહ્ણ નમોઽસ્તુ તે ॥ ૨॥

નિર્મિતા ત્વં પુરા દેવૈરર્ચિતા ત્વં સુરાસુરૈઃ ।
તુલસિ હર મે પાપં પૂજાં ગૃહ્ણ નમોઽસ્તુ તે ॥ ૩॥

મહાપ્રસાદજનની આધિવ્યાધિવિનાશિની ।
સર્વસૌભાગ્યદે દેવિ તુલસિ ત્વાં નમોઽસ્તુ તે ॥ ૪॥

યા દૃષ્ટા નિખિલાંસસંઘશમના સ્પૃષ્ટા વપુઃપાવના
રોગાણામભિવન્દિતા નિરસની સિક્તાન્તકત્રાસિની ।
પ્રત્યાસક્તિવિધાયિની ભગવતઃ કૃષ્ણસ્ય સંરોપિતા
ન્યસ્તા તચ્ચરણે વિમુક્તિફલદા તસ્યૈ તુલસ્યૈ નમઃ ॥ ૫॥

ભગવત્યાસ્તુલસ્યાસ્તુ માહાત્મ્યામૃતસાગરે ।
લોભાત્ કૂર્દિતુમિચ્છામિ ક્ષુદ્રસ્તત્ ક્ષમ્યતાં ત્વયા ॥ ૬॥

શ્રવણાદ્વાદશીયોગે શાલગ્રામશિલાર્ચને ।
યદ્ફલં સઙ્ગમે પ્રોક્તં તુલસીપૂજનેન તત્ ॥ ૭॥

ધાત્રીફલેન યત્ પુણ્યં જયન્ત્યાં સમુપોષણે ।
તદ્ફલં લભતે મર્ત્યાસ્તુલસીપૂજનેન તત્ ॥ ૮॥

યદ્ફલં પ્રયાગસ્નાને કાશ્યાં પ્રાણવિમોક્ષણે ।
તદ્ફલં વિહિતં દેવૈસ્તુલસીપૂજનેન તત્ ॥ ૯॥

ચતુર્ણામપિ વર્ણાનામાશ્રમાણાં વિશેષતઃ ।

સ્ત્રીણાં ચ પુરુષાણાં ચ પૂજિતેષ્ટં દદાતિ ચ ॥ ૧૦॥

તુલસી રોપિતા સિક્તા દૃષ્ટા સ્પૃષ્ટા ચ પાવયેત્ ।
આરાધિતા પ્રયત્નેન સર્વકામફલપ્રદા ॥ ૧૧॥

પ્રદક્ષિણં ભ્રમિત્વા યે નમસ્કુર્વન્તિ નિત્યશઃ ।
ન તેષાં દુરિતં કિઞ્ચિદક્ષીણમવશિષ્યતે ॥ ૧૨॥

પૂજ્યમાના ચ તુલસી યસ્ય વેશ્મનિ તિષ્ઠતિ ।
તસ્ય સર્વાણિ શ્રેયાંસિ વર્ધન્તેઽહરહઃ સદા ॥ ૧૩॥

પક્ષે પક્ષે ચ દ્વાદશ્યાં સમ્પ્રાપ્તે તુ હરેર્દિને ।
બ્રહ્માદયોઽપિ કુર્વન્તિ તુલસીવનપૂજનમ્ ॥ ૧૪॥

અનન્યમનસા નિત્યં તુલસીં સ્તૌતિ યો જનઃ ।
પિતૃદેવમનુષ્યાણાં પ્રિયો ભવતિ સર્વદા ॥ ૧૫॥

રતિં કરોમિ નાન્યત્ર તુલસીકાનનં વિના ।
સત્યં બ્રવીમિ તે સત્યે કલિકાલે મમ પ્રિયે ॥ ૧૬॥

હિત્વા તીર્થસહસ્રાણિ સર્વાનપિ શિલોચ્ચયાન્ ।
તુલસીકાનને નિત્યં કલૌ તિષ્ઠામિ ભામિનિ ॥ ૧૭॥

ન ધાત્રા સફલા યત્ર ન વિષ્ણુસ્તુલસીવનમ્।
તત્ સ્મશાનસમં સ્થાનં સન્તિ યત્ર ન વૈષ્ણવાઃ ॥ ૧૮॥

તુલસીગન્ધમાદાય યત્ર ગચ્છતિ મારુતઃ ।
દિશો દશ ચ પૂતાઃ સ્યુર્ભૂતગ્રામાશ્ચતુર્દશઃ ॥ ૧૯॥

તુલસીવનસંભૂતા છાયા પતતિ યત્ર વૈ ।
તત્ર શ્રાદ્ધં પ્રદાતવ્યં પિતૃણાં તૃપ્તિહેતવે ॥ ૨૦॥

તુલસી પૂજિતા નિત્યં સેવિતા રોપિતા શુભા ।
સ્નાપિતા તુલસી યૈસ્તુ તે વસન્તિ મમાલયે ॥ ૨૧॥

સર્વપાપહરં સર્વકામદં તુલસીવનમ્ ।
ન પશ્યતિ સમં સત્યે તુલસીવનરોપણાત્ ॥ ૨૨॥

તુલસ્યલઙ્કૃતા યે વૈ તુલસીવનપૂજકાઃ ।
તુલસીસ્થાપકા યે ચ તે ત્યાજ્યા યમકિઙ્કરૈઃ ॥ ૨૩॥

દર્શનં નર્મદાયાસ્તુ ગઙ્ગાસ્નાનં કલૌ યુગે ।
તુલસીદલસંસ્પર્શઃ સમમેતત્ત્રયં સ્મૃતમ્ ॥ ૨૪॥

દારિદ્ર્યદુઃખરોગાર્તિપાપાનિ સુબહૂન્યપિ ।
હરતે તુલસીક્ષેત્રં રોગાનિવ હરીતકી ॥ ૨૫॥

તુલસીકાનને યસ્તુ મુહૂર્તમપિ વિશ્રમેત્ ।
જન્મકોટિકૃતાત્ પાપાત્ મુચ્યતે નાત્ર સંશયઃ ॥ ૨૬॥

નિત્યં તુલસિકારણ્યે તિષ્ઠામિ સ્પૃહયા યુતઃ ।
અપિ મે ક્ષતપત્રૈકં કશ્ચિદ્ધન્યોઽર્પયેદિતિ ॥ ૨૭॥

તુલસીનામ યો બ્રૂયાત્ ત્રિકાલં વદને નરઃ ।
વિવર્ણવદનો ભૂત્વા તલ્લિપિં માર્જયેદ્યમઃ ॥ ૨૮॥

શુક્લપક્ષે યદા દેવિ તૃતીયા બુધસંયુતા ।
શ્રવણયા ચ સંયુક્તા તુલસી પુણ્યદા તદા ॥ ૨૯॥

ઇતિ તુલસીગીતા સમાપ્તા ॥

Encoded and proofread by PSA Easwaran

*tulasIgItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*